# .. Karunagita from Shrimadbhagavatam ..

# ॥ શ્રીમદ્ભાગવતાન્તર્ગતમ્ કરુણાગીતમ્ ॥

## Document Information

Text title : shrimadbhAgavatAntargataM karuNAgIta

File name : karuNAgIta.itx

Category : gItam

Location : doc_giitaa

Author : maharShi vyAsa

Language : Sanskrit

Subject : philosophy/hinduism/religion

Description-comments : Bhagavatam skanda 10 adhyAya 39

Latest update : November 10, 2012

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ શ્રીમદ્ભાગવતાન્તર્ગતમ્ કરુણાગીતમ્ ॥

શ્રીગોપ્ય ઊચુઃ ।
અહો વિધાતસ્તવ ન ક્વચિદ્દયા સંયોજ્ય મૈત્ર્યા પ્રણયેન દેહિનઃ ।
તાંશ્ચાકૃતાર્થાન્વિયુનઙ્ક્ષ્યપાર્થકં વિક્રીડિતં તેઽર્ભકચેષ્ટિતં યથા ॥ ૧૦.૩૯.૧૯॥

યસ્ત્વં પ્રદર્શ્યાસિતકુન્તલાવૃતં
મુકુન્દવક્ત્રં સુકપોલમુન્નસમ્ ।
શોકાપનોદસ્મિતલેશસુન્દરં
કરોષિ પારોક્ષ્યમસાધુ તે કૃતમ્ ॥ ૧૦.૩૯.૨૦॥

ક્રૂરસ્ત્વમક્રૂરસમાખ્યયા સ્મ નશ્
ચક્ષુર્હિ દત્તં હરસે બતાજ્ઞવત્ ।
યેનૈકદેશેઽખિલસર્ગસૌષ્ઠવં
ત્વદીયમદ્રાક્ષ્મ વયં મધુદ્વિષઃ ॥ ૧૦.૩૯.૨૧॥

ન નન્દસૂનુઃ ક્ષણભઙ્ગસૌહૃદઃ
સમીક્ષતે નઃ સ્વકૃતાતુરા બત ।
વિહાય ગેહાન્સ્વજનાન્સુતાન્પતીંસ્
તદ્દાસ્યમદ્ધોપગતા નવપ્રિયઃ ॥ ૧૦.૩૯.૨૨॥

સુખં પ્રભાતા રજનીયમાશિષઃ સત્યા બભૂવુઃ પુરયોષિતાં ધ્રુવમ્ ।
યાઃ સમ્પ્રવિષ્ટસ્ય મુખં વ્રજસ્પતેઃ પાસ્યન્ત્યપાઙ્ગોત્કલિતસ્મિતાસવમ્ ॥ ૧૦.૩૯.૨૩ ॥

તાસાં મુકુન્દો મધુમઞ્જુભાષિતૈર્ગૃહીતચિત્તઃ પરવાન્મનસ્વ્યપિ ।
કથં પુનર્નઃ પ્રતિયાસ્યતેઽબલા ગ્રામ્યાઃ સલજ્જસ્મિતવિભ્રમૈર્ભ્રમન્ ॥ ૧૦.૩૯.૨૪॥

અદ્ય ધ્રુવં તત્ર દૃશો ભવિષ્યતે દાશાર્હભોજાન્ધકવૃષ્ણિસાત્વતામ્ ।
મહોત્સવઃ શ્રીરમણં ગુણાસ્પદં દ્રક્ષ્યન્તિ યે ચાધ્વનિ દેવકીસુતમ્ ॥ ૧૦.૩૯.૨૫॥

મૈતદ્વિધસ્યાકરુણસ્ય નામ ભૂદક્રૂર ઇત્યેતદતીવ દારુણઃ ।
યોઽસાવનાશ્વાસ્ય સુદુઃખિતઞ્જનં પ્રિયાત્પ્રિયં નેષ્યતિ પારમધ્વનઃ ॥ ૧૦.૩૯.૨૬॥

અનાર્દ્રધીરેષ સમાસ્થિતો રથં તમન્વમી ચ ત્વરયન્તિ દુર્મદાઃ ।
ગોપા અનોભિઃ સ્થવિરૈરુપેક્ષિતં દૈવં ચ નોઽદ્ય પ્રતિકૂલમીહતે ॥ ૧૦.૩૯.૨૭॥

નિવારયામઃ સમુપેત્ય માધવં કિં નોઽકરિષ્યન્કુલવૃદ્ધબાન્ધવાઃ ।
મુકુન્દસઙ્ગાન્નિમિષાર્ધદુસ્ત્યજાદ્દૈવેન વિધ્વંસિતદીનચેતસામ્ ॥ ૧૦.૩૯.૨૮॥

યસ્યાનુરાગલલિતસ્મિતવલ્ગુમન્ત્ર
લીલાવલોકપરિરમ્ભણરાસગોષ્ઠામ્ ।

નીતાઃ સ્મ નઃ ક્ષણમિવ ક્ષણદા વિના તં
ગોપ્યઃ કથં ન્વતિતરેમ તમો દુરન્તમ્ ॥ ૧૦.૩૯.૨૯॥

યોઽહ્નઃ ક્ષયે વ્રજમનન્તસખઃ પરીતો
ગોપૈર્વિશન્ખુરરજશ્છુરિતાલકસ્રક્ ।
વેણું ક્વણન્સ્મિતકતાક્ષનિરીક્ષણેન
ચિત્તં ક્ષિણોત્યમુમૃતે નુ કથં ભવેમ ॥ ૧૦.૩૯.૩૦॥

॥ ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં દશમસ્કન્ધે
પૂર્વાર્ધેઽક્રૂરપ્રતિયાને એકોનચત્વારીંશોઽધ્યાયાન્તર્ગતં
કરુણાગીતં સમાપ્તમ્ ॥ ૧૦.૩૯॥

Bhagavatam skandha 10, adhyAya 39

.. Karunagita from Shrimadbhagavatam ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*